९५

स्तोत्राणि

विद्यार्थी

मध्यमा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्री

धन्याष्टकम्

श्रीगणेशायनमः ॥

तज्ज्ञानं प्रशमकरं यदिंद्रियाणां तज्ज्ञेयं यदुपनिषत्सु निश्चितार्थम् ॥ ते धन्या भुवि परमार्थ निश्चितेहाः शेषास्तु भ्रमनिलये परिभ्रमन्ति ॥ १ ॥ आदौ विजित्य विषयान्मद मोह राग द्वेषादि शत्रु गण माहृत योग राज्याः ॥ ज्ञात्वाऽमृतं समनुभूय परात्म विद्या कान्ता सुखा वत गृहे वि

चरंति धन्याः ॥२॥ त्यक्त्वा गृहे रतिमनोगतिहे तुभूतामात्मेच्छयोपनिषदर्थरसं पिबंतः ॥ वीतस्पृहाविषयभोगपदे विरक्ता धन्याश्चरंति विजनेषु विरक्तसंगाः ॥ ३॥ त्यक्त्वा ममाहमिति बंधकरे पदे द्वे मानावमानसदृशाः समदर्शिनश्च ॥ कर्तारमन्यमवगम्य तदर्पितानि कुर्वंति कर्मपरिपाकफलानि धन्याः ॥ ४ ॥ त्यक्त्वैषणात्रयमवेक्षितमोक्षमार्गा भैक्ष्यामृतेन परिकल्पितदेहयात्राः ॥ ज्योतिः परात्परतरं परमात्मसंज्ञं धन्या द्विजा रहसि हृद्यवलोकयंति ॥ ५ ॥ नासन्न सन्न सदसन्न महन्न चाणु न स्त्री पुमान्न च नपुंसकमेकबीजम् ॥ यैर्ब्रह्म तत्समनुपासितमेकचित्ता धन्या विरेजुरितरे भवपाशबद्धाः ॥ ६ ॥ अज्ञानपंकपरिमग्नमपेतसारं दुःखालयं मरणजन्मजरावसक्तम् ॥संसारबंधनमनित्यमवेक्ष्य धन्या ज्ञानासिना तदवशीर्य विनिश्चयंति ॥ ७॥ शांतैरनन्यमतिभिर्मधुरस्वभावैरेकत्वनिश्चितमनोभिरपेतमोहैः ॥ साकं वनेषु विजितात्मपद

स्वरूपं शास्त्रेषु सम्यगनिशं विमृशंति धन्याः ॥ ८॥ अहिमिव जनयोगं सर्वदा वर्जयेद्यः कुणपमिव सुनारीं त्यक्तुकामो विरागी ॥ विषमिव विषयान्यो मन्यमानो दुरंताञ्जयति परमहंसो मुक्तिभावं समेति ॥ ९ ॥ संपूर्णं जगदेव नंदनवनं सर्वेऽपि कल्पद्रुमा गांगं वारि समस्तवारिनिवहः पुण्याः समस्ताः क्रियाः ॥ वाचः प्राकृतसंस्कृताः श्रुतिशिरो वाराणसी मेदिनी सर्वावस्थितिरस्य वस्तुविषया दृष्टे परब्रह्मणि ॥ १० ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचितं धन्याष्टकस्तोत्रं संपूर्णम् ॥ ९४ ॥ ॥ ॥ ॥ ॥

॥ अथ विज्ञाननौका ॥

श्रीगणेशाय नमः ॥ तपोयज्ञदानादिभिः शुद्धबुद्धिर्विरक्तो नृपादौ पदे तुच्छबुद्ध्या॥परित्यज्य सर्वं यदाप्नोति तत्त्वं परं ब्रह्म नित्यं तदेवाहमस्मि ॥१ ॥ दयालुं गुरुं ब्रह्मनिष्ठं प्रशांतं समाराध्यमत्या विचार्य स्वरूपम् ॥ यदाप्नोति तत्त्वं निदिध्यास्य वि

द्धान्परं ब्रह्म० ॥ २ ॥ यदानंदरूपं प्रकाशस्वरूपं निरस्तप्रपंचं परिच्छेदशून्यम् ॥ अहंब्रह्मवृत्त्यैकगम्यं तुरीयं परं ब्रह्म० ॥ ३ ॥ यदज्ञानतोभाति विश्वं समस्तं विनष्टं च सद्यो यदात्मप्रबोधे ॥ मनोवागतीतं विशुद्धं विमुक्तं परं ब्रह्म० ॥ ४ ॥ निषेधे कृते नेति नेतीति वाक्यैः समाधिस्थितानां यदा भाति पूर्णम् ॥ अवस्थात्रयातीतमेकं तुरीयं परं ब्रह्म० ॥ ५ ॥ यदानंदलेशैः समानंदि विश्वं यदा भाति सत्त्वे तदाभातिसर्वम् ॥ यदालोचने रूपमन्यत्समस्तं परं ब्रह्म० ॥ ६॥ अनंतं विभुं सर्वयोनिं निरीहं शिवं संगहीनं यदोंकारगम्यम् ॥ निराकारमत्युज्ज्वलंमृत्युहीनं परं ब्रह्म० ॥ ७॥ यदानंदसिंधौ निमग्नः पुमान्स्यादविद्याविलासः समस्तप्रपंचः ॥ यदा न स्फुरत्यद्भुतं यन्निमित्तं परं ब्रह्म० ॥ ८ ॥ स्वरूपानुसंधानरूपां स्तुतिं यः पठेदादराद्भक्तिभावो मनुष्यः॥ शृणोतीह वा नित्यमुद्युक्तचित्तोभवेद्विष्णुरत्रैव वेदप्रमाणात् ॥ ९ ॥ विज्ञाननावं परिगृह्य कश्चित्तरेद्यद

ज्ञानमयं भवाब्धिम् ॥ज्ञानासिना यो हि विच्छिद्य तृष्णां विष्णोःपदं याति स एव धन्यः ॥ १० ॥ इति श्रीमत्पर०शंक०वि०विज्ञाननौकासंपूर्णा ॥ ९५ ॥

॥ अथ द्वादशपंजरिकास्तोत्रं ॥

श्रीगणेशाय नमः ॥ मूढ जहीहि धनागमतृष्णां कुरु सद्बुद्धिं मनसि वितृष्णाम् ॥ यल्लभसे निजकर्मोपात्तं वित्तं तेन विनोदय चित्तम् ॥ १ ॥ अर्थमनर्थं भावय नित्यं नास्ति ततः सुखलेशः सत्यम् ॥ पुत्रादपि धनभाजां भीतिःसर्वत्रैषा विहिता नीतिः ॥ २ का ते कांता कस्ते पुत्रः संसारोयमतीव विचित्रः॥ कस्य त्वं कः कुत आयातस्तत्त्वं चिंतय यदिदं भ्रांतः ॥ ३ ॥ मा कुरु जनधनयौवनगर्वं हरति निमेषात्कालः सर्वम् ॥ मायामयमिदमखिलं हित्वा ब्रह्मपदं त्वं प्रविश विदित्वा ॥ ४ ॥ कामं क्रोधं मोहं लोभं त्यक्त्वात्मानं भावय कोऽहम्॥आत्मज्ञानविहीना मूढास्ते पच्यंते नरकनिगूढाः ॥ ५ ॥ सुरमंदिरतरुमूलनिवासः शय्या भूतलमजिनं वासः ॥ स

र्वपरिग्रहभोगत्यागः कस्य सुखं न करोति विरागः ॥ ६ ॥ शत्रौ मित्रे पुत्रे बंधौ मा कुरु यत्नं विग्रह संधौ ॥ भव समचित्तः सर्वत्र त्वं वाञ्छस्याचिराद्य दि विष्णुत्वम् ॥७॥ त्वयि मयि चान्यत्रैको विष्णु र्व्यर्थं कुप्यसि सर्वसहिष्णुः ॥ सर्वस्मिन्नपि पश्या त्मानं सर्वत्रोत्सृज भेदाज्ञानम् ॥ ८ ॥ प्राणायामं प्रत्याहारं नित्यानित्यविवेकविचारम् ॥ जाप्यसमे तसमाधिविधानं कुर्ववधानं महदवधानम् ॥ ९ ॥ नलिनीदलगतसलिलं तरलं तद्वज्जीवितमतिशय चपलम् ॥ विद्धि व्याध्यभिमानग्रस्तं लोकं शोक हतं च समस्तम् ॥ १० ॥ का तेऽष्टादशदेशे चिंता वातुल तव किं नास्ति नियंता ॥ यस्त्वां हस्ते सु दृढनिबद्धं बोधयति प्रभवादिविरुद्धम् ॥ ११ ॥ गु रुचरणांबुजनिर्भरभक्तः संसारादचिराद्भवमुक्तः ॥ सेंद्रियमानसनियमादेवं द्रक्ष्यसि निजहृदयस्थं दे वम् ॥ १२ ॥ द्वादशपंजरिकामय एषः शिष्याणांक थितो ह्युपदेशः ॥ येषां चित्ते नैव विवेकस्ते पच्यंते

नरकमनेकम् ॥ १३ ॥ इति श्रीमच्छंकराचार्यविरचितं द्वादशपंजरिकास्तोत्रम् ॥ ९६ ॥ ॥ ६७ ॥

॥ अथ चर्पटपंजरिका ॥

श्रीगणेशाय नमः ॥ दिनमपि रजनी सायं प्रातः शिशिरवसंतौ पुनरायातः ॥ कालः क्रीडति गच्छत्यायुस्तदपि न मुंचत्याशावायुः ॥ १ ॥ भज गोविंदं भज गोविंदं भज गोविंदं मूढमते ॥ प्राप्ते सन्निहिते मरणे नहि नहि रक्षति डुकृञ्करणे ॥ ध्रुवपदं ॥ अग्रे वह्निः पृष्ठे भानू रात्रौ चुबुकसमर्पितजानुः ॥ करतलभिक्षा तरुतलवासस्तदपि न मुंचत्याशापाशः ॥ भज० ॥ २ ॥ यावद्वित्तोपार्जनसक्तस्तावन्निजपरिवारो रक्तः ॥ पश्चाद्धावति जर्जरदेहे वार्त्तां पृच्छति कोऽपि न गेहे ॥ भज गोविंदं भज० ॥ ३ ॥ जटिली मुंडी लुंचितकेशः काषायांबरबहुकृतवेषः ॥ पश्यन्नपि च न पश्यति मूढ उदरनिमित्तं बहुकृतवेषः ॥ भज गोविंद भज० ॥ ४ ॥ भगवद्गीता किंचिदधीता गंगाजललवकणिका पीता ॥ सकृदपि यस्य मु

रारिसमर्चा तस्य यमः किं कुरुते चर्चा ॥ भज गोविंदं भज० ॥ ५ ॥ अंगं गलितं पलितं मुंडं दशनविहीनं जातं तुंडम् ॥ वृद्धो याति गृहीत्वा दंडं तदपि न मुंचत्याशापिंडम् ॥ भज गोविंदं भ० ॥ ६ ॥ बालस्तावत्क्रीडासक्तस्तरुणस्तावत्तरुणीरक्तः ॥ वृद्धस्तावच्चिंतामग्नः परे ब्रह्मणि कोऽपि न लग्नः ॥ भज गोविंदं भज० ॥ ७ ॥ पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम् ॥ इह संसारे भवदुस्तारे कृपयाऽपारे पाहि मुरारे ॥ भज गोविंदं भज० ॥ ८ ॥ पुनरपि रजनी पुनरपि दिवसः पुनरपि पक्षः पुनरपि मासः ॥ पुनरप्ययनं पुनरपि वर्षं तदपि न मुंचत्याशामर्षम् ॥ भज गोविंदं भज गोविं० ॥ ९ ॥ वयसि गते कः कामविकारः शुष्के नीरे कः कासारः ॥ नष्टे द्रव्ये कः परिवारो ज्ञाते तत्त्वे कः संसारः ॥ भज गोविंदं भज० ॥ १० ॥ नारीस्तनभरनाभिनिवेशं मिथ्यामायामोहावेशम् ॥ एतन्मांसवसादिविकारं मनसि विचारय वारंवारम् ॥ भज गोविंदं भज गो०

॥ ११ ॥ कस्त्वं कोऽहं कुत आयातः का मे जननी को मे तातः ॥ इति परिभावय सर्वमसारं विश्वं त्यक्त्वा स्वप्नविचारम् ॥ भज गोविंदं भज० ॥ १२॥ गेयं गीतानामसहस्रं ध्येयं श्रीपतिरूपमजस्रम् ॥ मेयं सज्जनसंगे चित्तं देयं दीनजनाय च वित्तम् ॥ भज गोविंदं० ॥ १३॥ यावज्जीवो निवसति देहे कुशलं तावत्पृच्छति गेहे ॥ गतवति वायौ देहापाये भार्या बिभ्यति तस्मिन्काये ॥ भज गोविंदं भज०॥ ॥१४॥सुखतः क्रियते रामाभोगः पश्चाद्धंत शरीरे रोगः॥ यद्यपि लोके मरणं शरणं तदपि न मुंचति पापाचरणम्॥ भज गोविंदं भज० ॥ १५ ॥ रथ्याचर्पटाविरचितकंथः पुण्यापुण्यविवर्जितपंथः ॥ नाहं न त्वं नायं लोकस्तदपि किमर्थं क्रियते शोकः ॥ भज गोविंदं भज० ॥ १६ ॥ कुरुते गंगासागरगमनं व्रतपरिपालनमथवा दानम्॥ ज्ञानविहीने सर्वमनेन मुक्तिर्न भवति जन्मशतेन ॥ भज गोविंदं भज० ॥ १७॥ इति श्रीमच्छंकराचार्यविरचितं चर्पटपंज

रिकास्तोत्रं संपूर्णम् ॥१७॥ ॥ श्रीब्रह्मार्पणमस्तु ॥

॥ अथ हस्तामलकस्तोत्रं ॥

श्रीगणेशाय नमः ॥ कस्त्वं शिशो कस्य कुतोऽसि गंता किं नाम ते त्वं कुत आगतोसि ॥ एतन्मयोक्तं वद चार्भक त्वं मत्प्रीतये प्रीतिविवर्धनोस्मि॥१॥ हस्तामलक उवाच ॥ नाहं मनुष्यो न च देवयक्षौ न ब्राह्मणक्षत्रियवैश्यशूद्राः ॥ न ब्रह्मचारी न गृही वनस्थो भिक्षुर्न चाहं निजबोधरूपः ॥ २ ॥ निमित्तं मनश्चक्षुरादिप्रवृत्तौ निरस्ताखिलोपाधिराकाशकल्पः ॥ रविर्लोकचेष्टानिमित्तं यथा यः स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ ३ ॥ यमग्न्युष्णवन्नित्यबोधस्वरूपं मनश्चक्षुरादीन्यबोधात्मकानि ॥ प्रवर्तंत आश्रित्य निष्कंपमेकं स नित्योपलब्धिस्वरूपोऽह० ॥ ४ ॥ मुखाभासको दर्पणे दृश्यमानो मुखत्वात्पृथक्त्वेन नैवास्ति वस्तु॥ चिदाभासको धीषु जीवोऽपितद्वत्स नित्योपलब्धिस्वरूपोऽह० ॥ ५ ॥ यथादर्पणाभाव आभासहानौ मुखं विद्यते कल्प

नाहीनमेकम् ॥ तथा धीवियोगे निराभासको यः स नित्योप० ॥ ६ ॥ मनश्चक्षुरादेर्वियुक्तः स्वयं यो मनश्चक्षुरादेर्मनश्चक्षुरादिः ॥ मनश्चक्षुरादेरगम्य स्वरूपः स नित्योपल० ॥ ७ ॥ न एकोविभाति स्वतः शुद्धचेताः प्रकाशस्वरूपोऽपि नानेव धीषु ॥ शरावोदकस्थो यथा भानुरेकः स नित्योपल०॥८॥ यथाऽनेकचक्षुः प्रकाशो रविर्न क्रमेण प्रकाशी करोति प्रकाश्यम् ॥ अनेका धियो यस्तथैकः प्रबोधः स नित्योपल० ॥ ९ ॥ विवस्वत्प्रभातं यथारूपमक्षं प्रगृण्हाति नाभातमेवं विवस्वान् ॥यदाभात आभासयत्यक्षमेकः स नित्योपल० ॥ १०॥ यथा सूर्य एकोप्स्वनेकश्चलासु स्थिरास्वप्यनन्यद्विभाव्य स्वरूपः ॥ चलासु प्रभिन्नासुधीष्वेक एव स नित्योपल० ॥ ११ ॥ घनच्छन्नदृष्टिर्घनच्छन्नमर्कं यथा निष्प्रभं मन्यते चातिमूढः ॥ तथा बद्धवद्भाति यो मूढदृष्टेः स नित्योपल० ॥ १२ ॥ समस्तेषु वस्तुष्वनुस्यूतमेकं समस्तानि वस्तूनि यन्न स्पृशंति ॥

वियद्वत्सदा शुद्धमच्छस्वरूपं स नित्योपल०॥१३
उपाधौ यथा भेदता सन्मणीनां तथा भेदता बुद्धि
भेदेषु तेपि॥ यथा चंद्रिकाणां जले चंचलत्वं तथा
चंचलत्वं तवापीह विष्णो ॥ १४ ॥ इति श्रीमच्छं
कराचार्यकृतहस्तामलकसंवादस्तोत्रंसंपूर्णं॥९८॥

॥ अथ वैराग्यपंचकम् ॥

श्रीगणेशाय नमः ॥शिलंकिमनलं भवेदनलमौदरं
बाधितुं पयःप्रसृतिपूरकं किमु न धारकं सारसम् ॥
अयत्नमलमल्पकं पथि पटच्चरं कच्चरं भजंति विबु
धा मुधा अहह कुक्षितः कुक्षितः ॥१॥ दुरीश्वरद्वार
बहिर्वितर्दिकादुरासिकायै रचितोयमंजलिः ॥ यदं
जनाभं निरपायमस्ति नो धनंजयस्यंदनभूषणं ध
नम्॥ २॥ काचाय नीचं कमनीयवाचा मोचाफल
स्वादमुचा न याचे॥दया कुचेले धनदकुचेले स्थि
तेऽकुचेले श्रितमाकुचेले ॥३॥ क्षोणीकोणशतांश
पालनखलदुर्वारगर्वानलक्षुभ्यत्क्षुद्रनरेन्द्रचाटुरच
नां धन्यां न मन्यामहे ॥ देवं सेवितुमेव निश्चिनुम

ह्ये योसौ दयालुः पुरा धानामुष्टिमुचे कुचेलमुनये धत्तेस्म वित्तेशताम्॥ ४ ॥ शरीरपतनावधि प्रभुनिषेवणापादनादबिंधनधनंजयप्रशमदं धनं दंधनम्॥ धनंजयविवर्धनं धनमुदूढगोवर्धनं सुसाधनमबाधनंसुमनसां समाराधनम् ॥ ५ ॥ इति श्रीसर्वतंत्रस्वतंत्रवेदां०र्यकृतं वैराग्यपंचकं संपूर्णं ॥ ९९ ॥

॥ गुरुवरप्रार्थनापंचरत्नस्तोत्रं ॥

श्रीशं वंदे ॥ यं विज्ञातुं भृगुः स्वं पितरमुपगतःपंचवारं यथावज्ज्ञानादेवामृताप्तेः सततमनुपमं चिद्विवेकादि लब्ध्वा ॥ तस्मै तुभ्यं नमः श्रीहरिहरगुरवे सच्चिदानंदमुक्तानंताद्वैतप्रतीते नकुरु कितवतां पाहि मां दीनबंधो ॥ १ ॥ यस्माद्दृश्यस्य जन्मस्थितिविलयमिमे तैत्तिरीयाःपठंति स्वाविद्यामालयोगात्सुखशयनतले सुप्यतः स्वप्नवच्च ॥ तस्मै० ॥ २ ॥ यो वेदांतैकलभ्यः श्रुतिषु नियमितस्तैत्तिरीयैश्च कण्वैरन्यैरप्यानिषेकादुदयपरिमितं चारुसंस्कारभाजाम्॥ तस्मै० ॥३॥ यस्मिन्नेवावसन्नाः सैलक

श्री

॥ गुरु स्तोत्रम् ॥

ब्रह्मस्थान सरोजमध्य विलसच्छीतांशु पीठस्थितं॥
...ोत्सूर्य रुचिं वराभयकरं कर्पूर कुन्दोज्ज्वलम्॥
...त स्रग्वसनानुलेपनयुतं विद्युद्रुमा कान्तया॥
...श्लिष्टार्ध तनुं प्रसन्नवदनं वन्दे गुरुं सादरम्॥१॥
...द्ध्वान्त महान्ध विग्रहवतां चक्षूंसि चोन्मीलयन्॥
...श्चक्रे रुचिराणि तानि च महाज्ञानांजनाभ्यंजनैः॥
...पं यन्महतां जगत्त्रयमिदं तत्त्वप्रबोधोदयम्॥
...न्दे शिवरूपिणं निजगुरुं सर्वार्थसिद्धिप्रदम्॥२॥
...तंगी भुवनेश्वरी च बगला धूमावती भैरवी॥
...रा छिन्नशिरोधरा भगवती श्यामा रमा सुन्दरी॥
...तुं न प्रभवन्ति वांछितफलं यस्यप्रसादं विना॥
वन्दे शिवरूपिणं निजगुरुं सर्वार्थसिद्धिप्रदं॥३॥
...शी द्वारवती प्रयाग मथुराऽयोध्या गयाऽवन्तिका

नैते तारयितुं भवन्ति कुशला यस्यप्रसादं विन
तं वन्दे शिवरूपिणं निजगुरुं सर्वार्थ सिद्धि प्रद
रेवा सिन्धु सरस्वती त्रिपथगा सूर्यात्मजा कोशि
गंगा सागर संगमा दितनया लोहित्य शोणादयः
नालं यानि फलप्रदान विषये यस्यप्रसादं विना
तं वन्दे शिवरूपिणं निजगुरुं सर्वार्थ सिद्धिप्रद
सत्कीर्ति विमलं यशः सुकविता पांडित्य मारोग्य
नाहे वाक्पटुता कुलेन्चतुरता गांभीर्यमक्षोभ्यत
मांगल्यं प्रभुता गुणे निपुणता नो यत्प्रसादं विन
तं वन्दे शिवरूपिणं निजगुरुं सर्वार्थसिद्धिप्रद
लोकेशो हरि रंबिका स्मरहरो माता पिता रक्ष
आचार्यः कुलपूजितो यतिवरो वृद्धस्तथाभिक्षु
नैते यस्य तुलां व्रजन्ति कलया कारुण्य वारां निधे
तं वन्दे शिवरूपिणं निजगुरुं सर्वार्थ सिद्धि प्रद॥

ओ होम निषेवणं पितृमखो ह्यभ्यागतार्चा बलिः॥
ते व्यर्थ फला भवन्ति नियतं यस्यप्रसादं विना॥
वन्दे शिवरूपिणं निजगुरुं सर्वार्थसिद्धि प्रदम्॥८॥
:ईशाभिमुखः कृतांजलिपुटः श्लोकाष्टकं यः पठेत्॥
ऐश्वर्यं विधिं विनापि लभते मंत्रस्य सिद्धिं पराम्॥
विघ्नैः परिभूयते प्रतिदिनं प्राप्नोति पूजा फलम्॥
प्नोन्ते परमं पदं निवसते यद्योगिनां दुर्लभम्॥९॥
इति श्री गुरुस्तोत्रम्॥

नैते तारयितुं भवन्ति कुशला यस्य प्रसादं विना
तं वन्दे शिवरूपिणं निजगुरुं सर्वार्थ सिद्धि प्रदं
रेवा सिन्धु सरस्वती त्रिपथगा सूर्यात्मजा कौशि
गंगा सागर संगमादितनया लौहित्य शोणाद्वयः
नालं यान्ति फलप्रदान विषये यस्य प्रसादं विना ॥
तं वन्दे शिवरूपिणं निजगुरुं सर्वार्थ सिद्धिप्रदं
सत्कीर्ति विमलं यशः सुकविता पांडित्यमारोग्य
वादे वाक्पटुता कुलेन्चतुरता गांभीर्यमक्षोभ्यता
मांगल्यं प्रभुता गुणे निपुणता नो यत्प्रसादं विन
तं वन्दे शिवरूपिणं निजगुरुं सर्वार्थसिद्धि प्रदं
लोकेशो हरिरंबिका स्मरहरो माता पिता रक्ष
आचार्यः कुलपूजितो यतिवरो वृद्धस्तथा भिक्षु
नैते यस्य तुलां व्रजन्ति कलया कारुण्य वारां निधे
तं वन्दे शिवरूपिणं निजगुरुं सर्वार्थ सिद्धि प्रदं ॥५
ध्यानं दैवत पूजनं ... ...

ठो होम निषेवणं पितृमखो ह्यभ्यागतार्चा बलिः।
ते व्यर्थ फला भवन्ति नियतं यस्य प्रसादं विना।
वन्दे शिवरूपिणं निजगुरुं सर्वार्थसिद्धि प्रदम्॥ ७॥
नाशाभिमुखः कृतांजलिपुटः श्लोकाष्टकं यः पठेत्।
रश्चर्य विधिं विनापि लभते मंत्रस्य सिद्धिं पराम्॥
विघ्नैः परिभूयते प्रतिदिनं प्राप्नोति पूर्णां फलम्।
हान्ते परमेपदे निवसते यद्योगिनां दुर्लभम्॥ ८
इति श्री गुरु स्तोत्रम्॥

निगमवाङ्मौलयः सुप्तपुंसि प्रोक्तं तन्नाम यद्धाम्नि
जमहिमगतध्वांततत्कार्यरूपे ॥ तस्मै० ॥ ४ ॥ चित्त्वा
त्संकल्पपूर्वं सृजति जगदिदं योगिवन्मायया यः
स्वात्मन्येवामितीये परमसुखदृशि स्वप्नवद्भूम्नि नि
त्ये ॥ तस्मै० ॥ ५ ॥ इत्यच्युतविरचितं गुरुवरप्रा
र्थनापंचरत्नस्तोत्रं संपूर्णम् ॥ १०० ॥ ॥

॥ अथात्मबोधप्रारंभः ॥ पृष्ठ ६६ मे आ पंच० ६

श्रीगणेशाय नमः ॥ तपोभिः क्षीणपापानां शांता
नां वीतरागिणां ॥ मुमुक्षूणामपेक्ष्योयमात्मबोधो
विधीयते ॥ १ ॥ बोधोन्यसाधनेभ्यो हि साक्षान्मो
क्षैकसाधनं ॥ पाकस्य वन्हिवज्ज्ञानं विना मोक्षो
न सिध्यति ॥ २ ॥ अविरोधितया कर्म नाविद्यां वि
निवर्तयेत् ॥ विद्याऽविद्यां निहंत्येव तेजस्तिमिरसं
घवत् ॥ ३ ॥ परिच्छिन्नइवाज्ञानात्तन्नाशे सति केव
लः ॥ स्वयं प्रकाशते ह्यात्मा मेघापायेंशुमानिव
॥ ४ ॥ अज्ञानकलुषं जीवं ज्ञानाभ्यासाद्धि निर्मलं
॥ कृत्वाऽज्ञानं स्वयं नश्येज्जलं कतकरेणुवत् ॥ ५ ॥

संसारः स्वप्नतुल्यो हि रागद्वेषादिसंकुलः ॥ स्वकाले सत्यवद्भाति प्रबोधे सत्यसद्भवेत् ॥ ६ ॥ तावत्सत्यं जगद्भाति शुक्तिकारजतं यथा ॥ यावन्नज्ञायते ब्रह्म सर्वाधिष्ठानमद्वयं ॥ ७ ॥ सच्चिदात्मन्यनुस्यूते नित्ये विष्णौ प्रकल्पिताः॥ व्यक्तयो विविधाः सर्वा हाटके कटकादिवत् ॥ ८ ॥ यथाकाशो हृषीकेशो नानोपाधिगतो विभुः ॥ तद्भेदाद्भिन्नवद्भाति तन्नाशे सति केवलः ॥ ९ ॥ नानोपाधिवशादेव जातिवर्णाश्रमादयः ॥ आत्मन्यारोपितास्तोये रसवर्णादिभेदवत् ॥१०॥ पंचीकृतमहाभूतसंभवं कर्म संचितं ॥ शरीरं सुखदुःखानां भोगायतनमुच्यते ॥ ११ ॥ पंचप्राणमनोबुद्धिदशेंद्रियसमन्वितं ॥ अपंचीकृतभूतोत्थं सूक्ष्मांगं भोगसाधनं ॥१२॥ अनाद्यविद्याऽनिर्वाच्या कारणोपाधिरुच्यते ॥ उपाधित्रितयादन्यमात्मानमवधारयेत् ॥१३॥पंचकोशादियोगेन तत्तन्मय इवस्थितः॥शुद्धात्मा नीलवस्त्रादियोगेन स्फटिको यथा॥१४॥वपु

स्तुषादिभिः कोशैर्युक्तं युक्त्यावघाततः॥आत्मानमंतरं शुद्धं विविच्यात्तंदुलं यथा॥१५॥ सदा सर्वगतोप्यात्मा न सर्वत्रावभासते॥ बुद्धावेवावभासेत स्वच्छेषु प्रतिबिंबवत्॥१६॥ देहेंद्रियमनोबुद्धिप्रकृतिभ्यो विलक्षणं॥तद्वृत्तिसाक्षिणं विद्यादात्मानं राजवत्सदा॥ १७॥ व्याप्टतेष्विंद्रियेष्वात्मा व्यापारीवाविवेकिनां ॥ दृश्यतेऽभ्रेषु धावत्सु धावन्निव यथा शशी ॥१८॥ आत्मचैतन्यमाश्रित्य देहेंद्रियमनोधियः॥स्वकीयार्थेषु वर्तंते सूर्यालोकं यथा जनाः ॥१९॥ देहेंद्रियगुणान्कर्माण्यमले सच्चिदात्मनि॥ अध्यस्यंत्यविवेकेन गगने नीलतादिवत्॥२०॥अज्ञानान्मानसोपाधेः कर्तृत्वादीनि चात्मनि॥कल्प्यंतेंबुगतेचंद्रे चलनादि यथांभसः॥२१॥ रागेच्छासुखदुःखादि बुद्धौसत्यांप्रवर्तते॥ सुषुप्तौ नास्तितन्नाशे तस्माद्बुद्धेस्तु नात्मनः॥२२॥प्रकाशोऽर्कस्यतोयस्यशैत्यमग्नेर्यथोष्णता॥स्वभावः सच्चिदानंदनित्यनिर्मलतात्मनः॥ २३ ॥आत्मनः सच्चिदंशश्च बु

द्वेर्वृत्तिरितिद्वयं ॥ संयोज्य चाविवेकेन जानामीति प्रवर्तते ॥ २४॥ आत्मनो विक्रिया नास्ति बुद्धेर्बोधो न जात्विति ॥ जीवःसर्वमलं ज्ञात्वा कर्ता द्रष्टेति मुह्यति ॥ २५ ॥ रज्जुसर्पवदात्मानंजीवं ज्ञात्वा भयं वहेत् ॥ नाहं जीवः परात्मेति ज्ञातं चेन्निर्भयो भवेत् ॥ २६ ॥ आत्मावभासयत्येको बुद्ध्यादीनींद्रियाणि हि ॥ दीपोघटादिवत्स्वात्मा जडैस्तैर्नावभास्यते ॥ २७॥ स्वबोधेनान्यबोधेच्छा बोधरूपतयात्मनः ॥ नदीपस्यान्यदीपेच्छा यथा स्वात्मा प्रकाशते ॥ २८॥ निषिद्ध्य निखिलोपाधीन्नेतिनेतीति वाक्यतः ॥ विद्यादैक्यं महावाक्यैर्जीवात्मपरमात्मनोः ॥ २९ ॥ आविद्यकं शरीरादि दृश्यं बुद्बुदवत्क्षरं॥एतद्विलक्षणं विद्यादहं ब्रह्मेति निर्मलं॥ ३० देहान्यत्वान्नमे जन्म जराकार्श्यलयादयः ॥ शब्दादिविषयैः संगो निरिंद्रियतया न च ॥ ३१ ॥ अमनस्त्वान्न मे दुःखरागद्वेषभयादयः ॥ अप्राणो ह्यमनाः शुभ्र इत्यादि श्रुतिशासनात् ॥ ३२ ॥ निर्गुणो

निष्क्रियो नित्यो निर्विकल्पो निरंजनः॥ निर्विका
रो निराकारो नित्यमुक्तोऽस्मि निर्मलः ॥३३॥ अह
माकाशवत्सर्वबहिरंतर्गतोऽच्युतः ॥ सदा सर्वस
मःशुद्धो निःसंगो निर्मलोऽचलः ॥३४॥ नित्यशुद्ध
विमुक्तैकमखंडानंदमद्वयं॥सत्यं ज्ञानमनंतं यत्प
रं ब्रह्माहमेव तत्॥३५॥एवं निरंतराभ्यस्ता ब्रह्मैवा
स्मीति वासना ॥ हरत्यविद्याविक्षेपान् रोगानिव
रसायनं॥३५॥विविक्तदेशआसीनो विरागो विजि
तेंद्रियः॥भावयेदेकमात्मानं तमनंतमनन्यधीः३७
आत्मन्येवाखिलं दृश्यं प्रविलाप्य धिया सुधीः॥भा
वयेदेकमात्मानं निर्मलाकाशवत्सदा३८रूपवर्णा
दिकं सर्वं विहाय परमार्थवित्॥परिपूर्णचिदानंदस्व
रूपेणावतिष्ठते॥ ३९ ॥ ज्ञातृज्ञानज्ञेयभेदः परात्म
नि न विद्यते ॥ चिदानंदैकरूपत्वाद्दीप्यते स्वयमे
व हि ॥ ४० ॥ एवमात्मारणौ ध्यानमंथने सततं
कृते ॥ उदितावगतिर्ज्वाला सर्वाज्ञानेंधनं दहेत् ॥
॥ ४१॥ अरुणेनेव बोधेन पूर्वसंतमसे हृते ॥ तत

आविर्भवेदात्मा स्वयमेवांशुमानिव ॥ ४२ ॥ आ
त्मा तु सततं प्राप्तोप्यप्राप्तवदविद्यया ॥ तन्नाशे
प्राप्तवद्भाति स्वकंठाभरणंयथा ॥४३॥ स्थाणौ पु
रुषवद्भ्रांत्या कृता ब्रह्मणि जीवता॥जीवस्य तात्वि
के रूपे तस्मिन दृष्टे निवर्तते ॥४४॥ तत्त्वस्वरूपानु
भवादुत्पन्नं ज्ञानमंजसा ॥ अहंममेति चाज्ञानं बा
धते दिग्भ्रमादिवत् ॥ ४५ ॥ सम्यग्विज्ञानवान्
योगी स्वात्मन्येवाखिलं स्थितं ॥ एवं च सर्वमा
त्मानमीक्षते ज्ञानचक्षुषा ॥४६ ॥ आत्मैवेदं जग
त्सर्वमात्मनोन्यन्न विद्यते॥मृदोयद्वद्घटादीनिस्वा
त्मानं सर्वमीक्षते ॥४७ ॥ जीवन्मुक्तस्तु तद्विद्वान्पू
र्वोपाधिगुणांस्त्यजेत् ॥ सच्चिदानंदरूपत्वाद्भवेद्भ्र
मरकीटवत् ॥४८ ॥ तीर्त्वा मोहार्णवं हत्वा राग
द्वेषादिराक्षसान् ॥ योगी शांतसमायुक्तो ह्यात्मारा
मो विराजते॥ ४९॥ उपाधिस्थोऽपि तद्धर्मैर्नलि
प्तो व्योमवन्मुनिः॥ सर्वविन्मूढवत्तिष्ठेदसक्तो वायु
वच्चरेत् ॥ ५० ॥ बाह्यानित्यसुखासक्तिं हित्वाऽत्म

सुखानिर्वृत्तः ॥ घटस्थदीपवत् स्वच्छः स्वांतरेवप्रका
शते ॥ ५१ ॥ उपाधिविलयाद्विष्णौ निर्विशेषंविशे
न्मुनिः ॥ जले जलं वियद्व्योम्नि तेजस्तेजासि वा य
था ॥५२ ॥ यल्लाभान्नापरो लाभो यत्सुखान्नापरं सु
खं॥यज्ज्ञानान्नापरं ज्ञानं तद्ब्रह्मेत्यवधारयेत् ॥५३॥
यद्दृष्ट्वा न परं दृश्यं यद्भूत्वा नपुनर्भवः॥ यज्ज्ञात्वा
न परं यज्ञं तद्ब्रह्मेत्यवधारयेत् ॥५४॥ तिर्यगूर्ध्वमधः
पूर्णं सच्चिदानंदमव्ययं ॥ अनंतं नित्यमेकं यत्तद्ब्र
ह्मेत्यवधारयेत् ॥ ५५ ॥ अतद्व्यावृत्तिरूपेण वेदां
तैर्लक्ष्यतेऽव्ययं ॥ अखंडानंदमेकं यत्तद्ब्रह्मेत्यवधार
येत् ॥ ५६॥ अखंडानंदरूपस्य तस्यानंदलवाश्रि
ताः ॥ ब्रह्माद्यास्तारतम्येन भवंत्यानंदिनोऽखि
लाः ॥ ५७ ॥ तद्युक्तमखिलं वस्तु व्यवहार
स्तदन्वितः ॥ तस्मात्सर्वगतं ब्रह्म क्षीरे सर्पिरिवा
खिले ॥ ५८ ॥ अनण्वस्थूलमह्रस्वमदीर्घमजम
व्ययं ॥अरूपगुणवर्णाख्यं तद्ब्रह्मेत्यवधारयेत् ॥५९
यद्भासा भासतेऽर्कादिर्भास्यैर्यत्तु न भास्यते ॥ येन

सर्वमिदं भाति तद्ब्रह्मेत्यवधारयेत् ॥ ६० ॥ स्वयं
तर्बहिर्व्याप्य भासयन्निखिलं जगत् ॥ ब्रह्म प्रकाश
ते वन्हिप्रतप्तायसपिंडवत् ॥ ६१ ॥ जगद्विलक्षण
ब्रह्म ब्रह्मणोन्यन्न किंचन ॥ ब्रह्मान्यद्भाति चेन्मि
थ्या यथा मरुमरीचिका ॥ ६२ ॥ दृश्यते श्रूयते य
यद्ब्रह्मणोन्यन्न तद्भवेत् ॥ तत्त्वज्ञानाच्च तद्ब्रह्म
च्चिदानंदमद्वयं ॥ ६३ ॥ सर्वगं सच्चिदात्मानं ज्ञा
चक्षुर्निरीक्षते ॥ अज्ञानचक्षुर्नेक्षेत भास्वंतं भानुम
धवत् ॥ ६४ ॥ श्रवणादिभिरुद्दीप्तो ज्ञानाग्निपरित
पितः ॥ जीवः सर्वमलान्मुक्तः स्वर्णवद्द्योतते स्व
यं ॥ ६५ ॥ हृदाकाशोदितो ह्यात्मा बोधभानुस्त
मोपहृत् ॥ सर्वव्यापी सर्वधारी भाति सर्वं प्रकाश
ते ॥ ६६ ॥ दिग्देशकालाद्यनपेक्ष्य सर्वगं शीतादि
हन्नित्यसुखं निरंजनं ॥ यः स्वात्मतीर्थं भजते वि
निष्क्रियः स सर्ववित्सर्वगतोऽमृतो भवेत् ॥ ६७ ॥
इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमच्छंकरा
चार्यकृतात्मबोधः संपूर्णः ॥ १०१ ॥

॥अथ साधनपंचकं ॥

श्रीगणेशाय नमः ॥ वेदो नित्यमधीयतां तदुदितं
कर्म स्वनुष्ठीयतां तेनेशस्य विधीयतामपचितिः
काम्ये मतिस्त्यज्यतां॥पापौघः परिधूयतां भवसुखे
दोषोऽनुसंधीयतामात्मेच्छा व्यवसीयतां निजगृ
हात्तूर्णं विनिर्गम्यताम्॥ १ ॥ संगः सत्सुविधीयतां
भगवतो भक्तिर्दृढा धीयतां शांत्यादिः परिचीयतां
दृढतरं कर्माशु सं त्यज्यतां॥ सद्विद्वानुपसर्पतांप्रति
दिनं तत्पादुके सेव्यतांब्रह्मैकाक्षरमर्थ्यतां श्रुतिशि
रोवाक्यं समाकर्ण्यतां ॥ २ ॥ वाक्यार्थश्च विचार्य
तां श्रुतिशिरःपक्षः समाश्रीयतां दुस्तर्कात्सुविरम्य
तां श्रुतिमतस्तर्कोऽनुसंधीयतां॥ब्रह्मैवास्मि विभा
व्यतामहरहो गर्वः परित्यज्यतां देहेहंमतिरुज्झतां
बुधजनैर्वादः परित्यज्यतां ॥३॥ क्षुद्व्याधिश्चचिकि
त्स्यतां प्रतिदिनं भिक्षौषधं भुज्यतां स्वाद्वन्नं न तु
याच्यतां विधिवशात्प्राप्तेन संतुष्यतां ॥ शीतोष्णा
दिविषह्यतां न तु वृथा वाक्यं समुच्चार्यतामौदासी

न्यमभीप्स्यतां जनकृपानैष्ठुर्यमुत्सृज्यतां ॥ ४ ॥ै
कांते सुखमास्यतां परतरे चेतः समाधीयतां पूर्ण
त्मा सुसमीक्ष्यतां जगदिदं तद्बाधितं दृश्यतां शि
प्राक्कर्म प्रविलाप्यतां चितिबलान्नाप्युत्तरैः श्लिष्य
तां प्रारब्धं त्विह भुज्यतामथ परब्रह्मात्मना स्थीय
तां ॥५॥ यः श्लोकपंचकमिदं पठते मनुष्यः संचि
तयत्यनुदिनं स्थिरतामुपेत्य ॥ तस्याशु संसृतिद
वानलतीव्रघोरतापः प्रशांतिमुपयाति चितिप्रसा
दात् ॥६॥ इति श्रीमच्छंकराचार्यविरचितं साधन
पंचकं संपूर्णम् ॥ १०२ ॥ श्रीशंकरार्पणमस्तु ॥

॥ अथात्मषट्कस्तोत्रं ॥

श्रीगणेशाय नमः ॥ मनोबुद्ध्यहंकारचित्तानि नाहं
न च श्रोत्रजिह्वे न च घ्राणनेत्रे॥न च व्योमभूमी न
तेजो न वायुश्चिदानंदरूपः शिवोहं शिवोहम् ॥१॥
अहं प्राणवर्गो न पंचानिलो मे न तोयं न मे धातु
वो नैव कोशाः॥न वाक् पाणिपादौ न चोपस्थपायु
चिदानंदरूपः शिवोहं शिवोहम् ॥ २॥ न मे द्वेषरा

॥ौ न मे लोभमोहौ मदो नैव मे नैव मात्सर्यभावः
ण न धर्मो न चार्थो न कामो न मोक्षश्चिदानंदरूपः
ां शिवोहं शिवोहम् ॥ ३ ॥ न पुण्यं न पापं न सौ
ख्यं न दुःखं न मंत्रो न तीर्थं न वेदा न यज्ञाः ॥
अहं भोजनं नैव भोज्यं न भोक्ता चिदानंदरूपः
शिवोहं शिवोहम् ॥ ४ ॥ न मे मृत्युशंका न मे
जातिभेदः पिता नैव मे नैव माता न जन्म ॥
बंधुर्न मित्रं गुरुर्नैव शिष्यश्चिदानंदरूपः शिवो
हं शिवोहम् ॥ ५ ॥ अहं निर्विकल्पो निराकाररू
पो विभुर्व्याप्य सर्वत्र सर्वेंद्रियाणि ॥ सदा मे सम
त्वं न मुक्तिर्न बंधश्चिदानंदरूपः शिवोहं शिवोहम्
॥ ६ ॥ इति श्रीमच्छंकराचार्यविरचितमात्मषट्
कस्तोत्रं संपूर्णम् ॥ १०३ ॥ श्रीशंकरार्पणमस्तु ॥

॥ अथ सिद्धांतबिंदुः ॥

श्रीगणेशाय नमः ॥ न भूमिर्न तोयं न तेजो न वा
युर्न खं नेंद्रियं वा न तेषां समूहः ॥ अनैकांतिक
त्वात्सुषुप्तैकसिद्धस्तदेकोवशिष्टः शिवः केवलोहम्

॥ १ ॥ न वर्णा न वर्णाश्रमाचारधर्मा न मे धार
णाध्यानयोगादयोपि ॥ अनात्माश्रयाहंममाध्य
सहानात्तदेको० ॥ २ ॥ न माता पिता वा न देव
न लोका न वेदा न यज्ञा न तीर्थं ब्रुवंति ॥ सु
प्तौ निरस्तातिशून्यात्मकत्वात्तदेको० ॥ ३ ॥ न स
ख्यं न शैवं न तत्पांचरात्रं न जैनं न मीमांसका
मतं वा॥ विशिष्टानुभूत्या विशुद्धात्मकत्वात्तदेको
॥ ४ ॥ न चोर्ध्वं न चाधो न चांतर्न बाह्यं न मध्यं
न तिर्यङ्न पूर्वापरा दिक् ॥ वियद्व्यापकत्वादखंडै
करूपस्तदेको० ॥ ५ ॥ न शुक्लं न कृष्णं न रक्तं न
पीतं न कुब्जं न पीनं न ह्रस्वं न दीर्घं ॥ अरूपं त
था ज्योतिराकारकत्वात्तदेको० ॥ ६ ॥ न शास्त
न शास्त्रं न शिष्यो न शिक्षा न च त्वं न चाहं न
चायं प्रपंचः ॥ स्वरूपावबोधो विकल्पासहिष्णुस्त
देको० ॥ ७ ॥ न जाग्रन्न मे स्वप्नको वा सुषुप्तिर्न
विश्वो न वा तैजसः प्राज्ञको वा ॥ अविद्यात्मक
त्वात्त्रयाणां तुरीयस्तदेको० ॥ ८ ॥ अपि व्यापक

धात्वाद्धि तत्त्वप्रयोगात्स्वतःसिद्धभावादनन्याश्रय
त्वात् ॥ जगत्तुच्छमेतत्समस्तं तदन्यत्तदेको०॥९॥
न चैकं तदन्याद्द्वितीयं कुतः स्यान्न वा केवलत्वं
सु चाकेवलत्वं ॥ न शून्यं न चाशून्यमद्वैतकत्वा
कथं सर्ववेदांतसिद्धं ब्रवीमि ॥ १० ॥ इति श्रीम
छंकराचार्यविरचितः सिद्धांतबिंदुः ॥ १०४ ॥

॥ अथ मनीषापंचकं ॥

श्रीगणेशाय नमः॥सत्याचार्यस्य गमने कदाचिन्मु
क्तिदायकं ॥ काशीक्षेत्रं प्रति सह गौर्या मार्गे तु शं
करं ॥१ ॥ अंत्यवेषधरं दृष्ट्वा गच्छ गच्छेति चाब्रवी
तु ॥ शंकरः सोपि चांडालस्तं पुनः प्राह शंकरं ॥२॥
तमन्नमयादन्नमयमथवा चैतन्यमेव चैतन्यात् ॥
न्द्वेजवर दूरीकर्तुं वांछसि किं ब्रूहि गच्छ गच्छेति
३ ॥ किं गंगांबुनि बिंबितेंबरमणौ चंडालवाटीप
यःपूरेचांतरमस्ति कांचनघटीमृत्कुंभयोर्वांबरे ॥ प्र
त्यग्वस्तुनि निस्तरंगसहजानंदावबोधांबुधौ विप्रो
यं श्वपचोयमित्यपि महान् कोयं विभेदभ्रमः ॥ ४॥

जाग्रत्स्वप्नसुषुप्तिषु स्फुटतरा या संविदुज्जृंभते य
ब्रह्मादिपिपीलिकांततनुषु प्रोता जगत्साक्षिणी
सैवाहं न च दृश्यवस्त्विति दृढप्रज्ञापि यस्यास्ति
श्चांडालोस्तु स तु द्विजोस्तु गुरुरित्येषा मनीषाम
॥ ५ ॥ ब्रह्मैवाहमिदं जगच्च सकलं चिन्मात्र
स्तारितं सर्वं चैतदविद्यया त्रिगुणया शेषं मय
कल्पितं ॥इत्थं यस्य दृढा मतिःसुखतरे नित्ये प
निर्मले चांडालोस्तु स तु० ॥ ६ ॥ शश्वन्नश्वरमे
विश्वमखिलं निश्चित्य वाचा गुरोर्नित्यं ब्रह्म नि
तरं विमृशता निर्व्याजशांतात्मना ॥ भूतं भावि
दुष्कृतं प्रदहता संविन्मये पावके प्रारब्धाय समर्पि
तं स्ववपुरित्येषा मनीषा मम ॥ ७ ॥ या तिर्यङ्
रदेवताभिरहमित्यंतःस्फुटा गृह्यते यद्भासा हृदय
क्षदेहविषया भांति स्वतोऽचेतनाः ॥ तां भास्यैः पि
हितार्कमंडलनिभां स्फूर्तिं सदा भावयन्योगी नि
तमानसो हि गुरुरित्येषा मनीषा मम ॥ ८ ॥ यत्सौ
ख्यांबुधिलेशलेशत इमे शक्रादयो निर्वृता यश्चि

नितरां प्रशांतकलने लब्धा मुनिर्निर्वृतः॥ यस्मि
न्नित्यसुखांबुधौ गलितधीर्ब्रह्मैव न ब्रह्मविद्यः कश्चि
त्स सुरेंद्रवंदितपदो नूनं मनीषा मम ॥९॥ इति
मनीषापंचकं संपूर्णं ॥ १०६ ॥ ॥ ६९ ॥

॥ अथ वाक्यवृत्तिः ॥

श्रीगणेशायनमः ॥ सर्गस्थितिप्रलयहेतुमचिंत्यश
क्तिं विश्वेश्वरं विदितविश्वमनंतमूर्तिं ॥ निर्मुक्तबंध
नमपारसुखांबुराशिं श्रीवल्लभं विमलबोधघनं न
मामि ॥१॥ यस्य प्रसादादहमेव विष्णुर्मय्येव सर्वं
परिकल्पितं च ॥ इत्थं विजानामि सदात्मरूपं त
स्यांघ्रिपद्मं प्रणतोस्मि नित्यं ॥२॥ तापत्रयार्कसंत
प्तः कश्चिदुद्विग्नमानसः॥ शमादिसाधनैर्युक्तः सद्गुरुं
परिपृच्छति ॥३॥ अनायासेन येनास्मान्मुच्येयं भ
वबंधनात् ॥ तन्मे संक्षिप्य भगवन्कैवल्यं कृपया व
द ॥ ४ ॥ साध्वी ते वचनव्यक्तिः प्रतिभाति वदा
मि ते ॥ इदं तदिति विस्पष्टं सावधानमनाः शृणु
॥ ५ ॥ तत्त्वमस्यादिवाक्योत्थं यज्जीवपरमात्म

नोः ॥ तादात्म्यविषयं ज्ञानं तदिदं मुक्तिसाधनं वे
॥ ६ ॥ को जीवः कः परश्चात्मा तादात्म्यं वा कथं व
तयोः ॥ तत्त्वमस्यादिवाक्यं वा कथं तत्प्रतिपाद नि
येत् ॥ ७ ॥ अत्र ब्रूमः समाधानं कोन्यो जीवस्त्व रय
मेव हि ॥ यस्त्वं पृच्छसि मां कोहं ब्रह्मैवासि न वि
संशयः ॥ ८॥ पदार्थमेव जानामि नाद्यापि भगव॥
न् स्फुटं ॥ अहं ब्रह्मेति वाक्यार्थं प्रतिपद्ये कथं क्ष
वद ॥९॥ सत्यमाह भवानत्र विगानं नैव विद्यते । य
हेतुःपदार्थबोधो हि वाक्यार्थावगतेरिह॥१०॥अंत बु
करणतद्वृत्तिसाक्षी चैतन्यविग्रहः ॥ आनंदरूपः सअ
त्यः सन् किं नात्मानं प्रपद्यसे ॥ ११ ॥ सत्यानंदहें
स्य रूपं धीसाक्षिणं बोधविग्रहं ॥चिंतयात्मतय ग
नित्यं त्यक्त्वादेहादिगां धियं ॥ १२ ॥ रूपादिमा वे
न्यतः पिंडस्ततो नात्माघटादिवत् ॥वियदादिमहा ग
भूतविकारत्वाच्च कुंभवत् ॥ १३ ॥ अनात्मा यदि त्रि
पिण्डोयमुक्तहेतुबलान्मतः ॥ करामलकवत्साक्षा स
दात्मानं प्रतिपादय ॥ १४॥ घटद्रष्टा घटाद्भिन्नः दे

वथा न घटो यथा ॥ देहद्रष्टा तथा देहो नाहमित्य
वधारय ॥१५॥ एवमिंद्रियदृङ्नाहमिंद्रियाणीति
निश्चिनु ॥ मनो बुद्धिस्तथा प्राणो नाहमित्यवधा
रय ॥ १६ ॥ संघातोऽपि तथा नाहमिति दृश्य
विलक्षणं ॥ द्रष्टारमनुमानेन निपुणं संप्रधारय
॥ १७ ॥ देहेन्द्रियादयो भावा हानादिव्यापृति
क्षमाः ॥ यस्य सन्निधिमात्रेण सोहमित्यवधार
य ॥ १८॥अनापन्नविकारः सन्नयस्कांतवदेवयः ॥
बुद्ध्यादींश्चालयेत्प्रत्यक् सोहमित्यवधारय ॥१९॥
अजडात्मवदाभांति यत्सान्निध्याज्जडा अपि ॥ दे
हेंद्रियमनःप्राणाः सोहमित्यवधारय ॥ २० ॥ अ
गमन्मे मनोऽन्यत्र सांप्रतं च स्थिरीकृतं ॥ एवं यो
वेत्ति धीवृत्तिं सोहमित्यवधारय ॥ २१ ॥ स्वप्नजा
गरिते सुप्तिं भावाभावौ धियां तथा ॥ यो वेत्त्यवि
क्रियः साक्षात्सोहमित्यवधारय ॥ २२ ॥ घटावभा
सको दीपो घटादन्यो यथेष्यते ॥ देहावभासको
देही तथाहं बोधविग्रहः ॥२३ ॥ पुत्रवित्तादयो भा

वा यस्य शेषतया प्रियाः ॥ द्रष्टा सर्वप्रियतमः सो
हमित्यवधारय ॥ २४ ॥ परप्रेमास्पदतया मानभ
वमहं सदा ॥ भूयासमिति यो द्रष्टा सोहमित्यव
धारय ॥ २५ ॥ यः साक्षिलक्षणो बोधस्त्वंपद
र्थः स उच्यते ॥ साक्षित्वमपि बोधृत्वमविका
तयाऽऽत्मनः ॥ २६ ॥ देहेंद्रियमनःप्राणाहंकृति
भ्यो विलक्षणः ॥ प्रोज्झिताशेषषड्भावविकारस्त्व
पदाभिधः ॥ २७ ॥ त्वमर्थमेवं निश्चित्य तदर्थं चि
तयेत्पुनः ॥ अतद्व्यावृत्तिरूपेण साक्षाद्विधिमुखेन
च ॥ २८ ॥ निरस्ताशेषसंसारदोषोऽस्थूलादिलक्ष
णः॥अदृश्यत्वादिगुणकः पराकृततमोमलः॥२९
निरस्तातिशयानंदः सत्यप्रज्ञानविग्रहः ॥ सत्तास्व
लक्षणः पूर्णः परमात्मेति गीयते ॥ ३० ॥ सर्वज्ञत्वं
परेशत्वं तथा संपूर्णशक्तिता ॥ वेदैः समर्थ्यते य
स्य तद्ब्रह्मेत्यवधारय ॥ ३१ ॥ यज्ज्ञानात्सर्वविज्ञा
नं श्रुतिषु प्रतिपादितं ॥ मृदाद्यनेकदृष्टांतैस्तद्ब्रह्मे
त्यवधारय ॥ ३२ ॥ यदानंत्यं प्रतिज्ञाय श्रुतिस

त्सिद्धये जगौ ॥ तत्कार्यत्वं प्रपंचस्य तद्ब्रह्मेत्यवधा
रय ॥ ३३ ॥ विजिज्ञास्यतया यच्च वेदांतेषु मुमुक्षु
भिः ॥ समर्थ्यतेऽतियत्नेन तद्ब्रह्मेत्यवधारय ॥ ३४ ॥
जीवात्मना प्रवेशश्च नियंतृत्वं च तान् प्रति ॥ श्रू
यते यस्य वेदेषु तद्ब्रह्मेत्यवधारय ॥ ३५ ॥ कर्मणां
फलदातृत्वं यस्यैव श्रूयते श्रुतौ ॥ जीवानां हेतुक
र्तृत्वं तद्ब्रह्मेत्यवधारय ॥ ३६ ॥ तत्त्वंपदार्थौ निर्णीतौ
वाक्यार्थश्चिंत्यतेऽधुना ॥ तादात्म्यमत्रवाक्यार्थस्त
योरेव पदार्थयोः ॥ ३७ ॥ संसर्गो वा विशिष्टो वा
वाक्यार्थो नात्र संमतः ॥ अखंडैकरसत्वेन वाक्या
र्थो विदुषां मतः ॥ ३८ ॥ प्रत्यग्बोधो य आभाति सो
द्वयानंदलक्षणः ॥ अद्वयानंदरूपश्च प्रत्यग्बोधैकल
क्षणः ॥ ३९ ॥ इत्थमन्योन्यतादात्म्यप्रतिपत्तिर्य
दा भवेत् ॥ अब्रह्मत्वं त्वमर्थस्य व्यावर्तेत तदैव हि
॥ ४० ॥ तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृ
णु ॥ पूर्णानंदैकरूपेण प्रत्यग्बोधोवतिष्ठते ४१ ॥ त
त्त्वमस्यादिवाक्यं च तादात्म्यप्रतिपादने ॥ लक्ष्यौ

तत्त्वंपदार्थौ द्वावुपादाय प्रवर्तते ॥ ४२ ॥ हित्वा द्वौ शबलौ वाच्यौ वाक्यं वाक्यार्थबोधने ॥ यथा प्रवर्ततेऽस्माभिस्तथा व्याख्यातमादरात् ॥ ४३ ॥ आलंबनतया भाति योस्मत्प्रत्ययशब्दयोः ॥ अंतःकरणसंभिन्नबोधः स त्वंपदाभिधः ॥ ४४ ॥ मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षणः ॥ पारोक्ष्य शबलः सत्याद्यात्मकस्तत्पदाभिधः ॥ ४५ ॥ प्रत्यक्परोक्षतैकस्य सद्द्वितीयत्वपूर्णता ॥ विरुध्यते यतस्तस्माल्लक्षणा संप्रवर्तते ॥ ४६ ॥ मानांतरावरोधे तु मुख्यार्थस्य परिग्रहे ॥ मुख्यार्थेनाविनाभूते प्रतीतिर्लक्षणोच्यते ॥ ४७ ॥ तत्त्वमस्यादिवाक्येषु लक्षणा भागलक्षणा ॥ सोहमित्यादिवाक्यस्थपदयोरिव नापरा ॥४८॥ अहं ब्रह्मेति वाक्यार्थबोधो यावद्दृढीभवेत् ॥ शमादिसहितस्तावदभ्यसेच्छ्रवणादिकं ॥४९॥ श्रुत्याचार्यप्रसादेन दृढो बोधो यदा भवेत् ॥निरस्ताशेषसंसारनिदानःपुरुषस्तदा॥ ॥ ५० ॥ विशीर्णकार्यकरणो भूतसूक्ष्मैरनावृतः ॥

विमुक्तकर्मनिगडः सद्य एव विमुच्यते ॥ ५१॥ प्रारब्धकर्मवेगेन जीवन्मुक्तो यदा भवेत् ॥ किंचित्कालमनारब्धकर्मबंधस्य संक्षये ॥ ५२ ॥ निरस्तातिशयानंदं वैष्णवं परमं पदं॥ पुनरावृत्तिरहितं कैवल्यं प्रतिपद्यते ॥ ५३ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचिता वाक्यवृत्तिः संपूर्णा ॥ १०६ ॥ ॥ श्रीमच्छंकरार्पणमस्तु ॥

॥ अथ परापूजा ॥

श्रीगणेशाय नमः ॥ पूर्णस्यावाहनं कुत्र सर्वाधारस्य चासनं॥ स्वच्छस्य पाद्यमर्घ्यं च शुद्धस्याचमनं कुतः॥ १ ॥ निर्मलस्य कुतः स्नानं वस्त्रं विश्वोदरस्य च ॥ निरालंबस्योपवीतं पुष्पं निर्वासनस्य च ॥२॥ निर्लेपस्य कुतो गंधो रम्यस्याभरणं कुतः॥ नित्यतृप्तस्य नैवेद्यं तांबूलं च कुतो विभोः ॥ ३ ॥ प्रदक्षिणा ह्यनंतस्य ह्यद्वयस्य कुतो नतिः ॥ वेदवाक्यैरवेद्यस्य कुतः स्तोत्रं विधीयते ॥ ४ ॥ स्वयंप्रकाशमानस्य कुतो नीराजनं विभोः ॥ अंतर्बहि

श्च पूर्णस्य कथमुद्वासनं भवेत् ॥ ५॥एवमेव परा पूजा सर्वावस्थासु सर्वदा ॥एकबुद्ध्या तु देवेशो विधेया ब्रह्मवित्तमैः ॥ ६ ॥इति परापूजा ॥ १०७ ॥

॥ अथ हरिहरात्मकस्तोत्रम् ॥

श्रीगणेशाय नमः॥ गोविंद माधव मुकुंद हरे मुरारे शंभो शिवेश शशिशेखर शूलपाणे ॥ दामोदराच्युत जनार्दन वासुदेव त्याज्या भटा य इति संततमामनंति॥१॥गंगाधरांधकरिपो हर नीलकंठ वैकुंठ कैटभरिपो कमठाब्जपाणे॥भूतेश खंडपरशो मृड चंडिकेश त्याज्या भटा य इति संततमामनंति ॥२॥ विष्णो नृसिंह मधुसूदन चक्रपाणे गौरीपते गिरिश शंकर चंद्रचूड ॥ नारायणासुरनिबर्हण शार्ङ्गपाणे त्याज्या भटा य इति संततमा० ॥३॥ मृत्युंजयोग्र विषमेक्षण कामशत्रो श्रीकांत पीतवसनांबुदनील शौरे॥ ईशान कृत्तिवसन त्रिदशैकनाथ त्याज्या भटा य० ॥ ४ ॥ लक्ष्मीपते मधुरिपो पुरुषोत्तमाद्य श्रीकंठ दिग्वसन शांत पिनाकपाणे ॥ आनंदकंद

धरणीधर पद्मनाभ त्याज्या भटा य इतिसं०॥५॥
सर्वेश्वर त्रिपुरसूदन देवदेव ब्रह्मण्यदेव गरुडध्वज
शंखपाणे ॥ त्र्यक्षोरगाभरण बालमृगांकमौले त्या
ज्या भटा य०॥६॥ श्रीराम राघव रमेश्वर रावणारे
भूतेश मन्मथरिपो प्रमथाधिनाथ ॥ चाणूरमर्दन
हृषीकपते मुरारे त्याज्या भटा०॥७॥ शूलिन् गि
रीश रजनीशकलावतंस कंसप्रणाशन सनातन के
शिनाश ॥ भर्ग त्रिनेत्र भव भूतपते पुरारे त्याज्या
भटा०॥ ८॥ गोपीपते यदुपते वसुदेवसूनो कर्पुर
गौर वृषभध्वज भालनेत्र ॥गोवर्धनोद्धरण धर्मधुरी
ण गोप त्याज्या भटा०॥९॥ स्थाणो त्रिलोचन पि
नाकधर स्मरारे कृष्णानिरुद्ध कमलाकर कल्मषारे
॥ विश्वेश्वर त्रिपथगार्द्रजटाकलाप त्याज्या०॥१०
अष्टोत्तराधिकशतेन सुचारुनाम्नां संदर्भितां ललि
तरत्नकदंबकेन॥सन्नायकां दृढगुणां निजकंठगां यः
कुर्यादिमां स्रजमहो स यमं न पश्येत्॥ ११ ॥ ग
णावूचतुः ॥ इत्थं द्विजेंद्र निजभृत्यगणान्सदैव सं

शिक्षयेदवनिगान्स हि धर्मराजः॥अन्येऽपि ये हरि हरांकधरा धरायां ते दूरतः पुनरहो परिवर्जनीयाः ॥१२॥ अगस्त्य उवाच ॥ यो धर्मराजचरितां ल लितप्रबंधां नामावलिं सकलकल्मषबीजहंत्रीम् ॥ धीरोऽत्र कौस्तुभभृतः शशिभूषणस्य नित्यं जपे त्स्तनरसं न पिबेत्स मातुः ॥ १३ ॥ इति शृण्वन्क थां रम्यां शिवशर्मा प्रियेऽनघां ॥ प्रहर्षवक्त्रः पुरतो ददर्शाप्सरसां पुरीं ॥ १४ ॥ इति श्रीस्कंदपुराणे काशीखंडे धर्मराजविरचिता हरिहराष्टोत्तरशत नामावलिः संपूर्णा ॥ १०८ ॥ ॥ ७ ॥

॥ अथ दत्तात्रेयस्तोत्रम् ॥

श्रीगणेशाय नमः॥जटाधरं पांडुरंगं शूलहस्तं कृपा निधिं ॥ सर्वरोगहरं देवं दत्तात्रेयमहं भजे ॥ १ ॥ अस्य श्रीदत्तत्रेयस्तोत्रमंत्रस्य भगवान्नारद ऋषिः ॥ अनुष्टुप्छंदः॥ श्रीदत्तः परमात्मा देवता ॥ श्री दत्तप्रीत्यर्थं जपे विनियोगः ॥ जगदुत्पत्तिकर्त्रे च स्थितिसंहारहेतवे ॥ भवपाशविमुक्ताय दत्तात्रेय

नमोस्तु ते ॥ १ ॥ जराजन्मविनाशाय देहशुद्धिकराय च॥दिगंबर दयामूर्त्ते दत्तात्रेय नमोऽस्तु ते ॥ २ ॥ कर्पूरकांतिदेहाय ब्रह्ममूर्तिधराय च ॥ वेदशास्त्रपरिज्ञाय दत्तात्रेय नमोऽस्तु ते ॥ ३ ॥ ह्रस्वदीर्घकृशस्थूलनामगोत्रविवर्जित ॥पंचभूतकदीप्ताय दत्तात्रेय नमोस्तु ते ॥४॥ यज्ञभोक्त्रे च यज्ञाय यज्ञरूपधराय च ॥ यज्ञप्रियाय सिद्धाय दत्तात्रेय नमोऽस्तु ते ॥ ५ ॥ आदौ ब्रह्मा मध्ये विष्णुरंते देवः सदाशिवः ॥ मूर्तित्रयस्वरूपाय दत्तात्रेय नमोस्तु ते ॥ ६ ॥ भोगालयाय भोगाय योग्ययोग्याय धारिणे ॥ जितेंद्रियजितज्ञाय दत्तात्रेय० ॥ ७ ॥ दिगंबराय दिव्याय दिव्यरूपधराय च ॥ सदोदितपरब्रह्म दत्तात्रेय नमोऽस्तु ते ॥ ८ ॥ जंबूद्वीपे महाक्षेत्रे मातापुरनिवासिने ॥जयमानसतांदेव दत्तात्रेय नमोऽस्तु ते॥९॥भिक्षाटनं गृहे ग्रामे पात्रं हेममयं करे ॥ नानास्वादमयी भिक्षा दत्तात्रेय नमोऽस्तु ते ॥ १० ॥ ब्रह्मज्ञानमयी मुद्रा वस्त्रमाकाशभू

तले ॥प्रज्ञानघनबोधाय दत्तात्रेय नमोस्तु ते॥११॥
अवधूत सदानंद परब्रह्मस्वरूपिणे॥ विदेहदेहरूपा
य दत्तात्रेय० ॥ १२ ॥ सत्यरूप सदाचार सत्यधर्म
परायण ॥ सत्याश्रय परोक्षाय दत्तात्रेय० ॥१३ ॥
शूलहस्त गदापाणे वनमालासुकंधर ॥ यज्ञसूत्रधर
ब्रह्म दत्तात्रेय० ॥ १४॥ क्षराक्षरस्वरूपाय परात्पर
तराय च ॥ दत्तमुक्तिपरस्तोत्र दत्तात्रेय० ॥१५ ॥
दत्तविद्याय लक्ष्मीश दत्तस्वात्मस्वरूपिणे॥गुणानि
र्गुणरूपाय दत्तात्रेय० ॥ १६ ॥ शत्रुनाशकरं स्तोत्रं
ज्ञानविज्ञानदायकम् ॥ सर्वपापं शमं याति दत्तात्रे
य न०॥१७ ॥ इदं स्तोत्रं महद्दिव्यं दत्तप्रत्यक्षका
रकम् ॥ दत्तात्रेयप्रसादाच्च नारदेन प्रकीर्तितम् ॥
॥ १८॥ इति श्रीनारदपुराणे नारदविरचितं दत्ता
त्रेयस्तोत्रं संपूर्णम् ॥ १०९ ॥ ॥ ॥ ॥

॥ अथ शिवरामाष्टकं ॥

श्रीगणेशाय नमः ॥ शिव हरे शिव रामसखे प्रभो
त्रिविधतापनिवारण हे विभो ॥ अज जनेश्वर याद

व पाहि मां शिव हरे विजयं कुरु मे वरम्॥१॥ कम
ललोचन राम दयानिधे हर गुरो गजरक्षक गोपते
॥ शिवतनो भव शंकर पाहि मां शिव हरे वि०॥२
स्वजनरंजन मंगलमंदिरं भजति ते पुरुषं परमं पद
म् ॥ भवति तस्य सुखं परमद्भुतं शिव हरे वि०
॥ ३ ॥ जय युधिष्ठिरवल्लभ भूपते जय जयार्जित
पुण्यपयोनिधे ॥ जय कृपामय कृष्ण नमोस्तुते
शिव हरे विज० ॥ ४ ॥ भवविमोचन माधव माप
ते सुकविमानसहंस शिवारते ॥ जनकजारत राघ
व रक्ष मां शिव हरे वि० ॥ ५ ॥ अवनिमंडलमंग
ल मापते जलदसुंदर राम रमापते ॥ निगमकीर्ति
गुणार्णव गोपते शिव हरे वि० ॥ ६ ॥ पतितपाव
न नाममयी लता तवयशो विमलं परिगीयते ॥
तदपि माधव मां किमुपेक्षसे शिव हरे वि० ॥ ७ ॥
अमरतापरदेव रमापते विजयतस्तव नामघनो
पमा ॥ मयि कथं करुणार्णव जायते शिव ह० ॥ ८ ॥
हनुमतःप्रिय चापकर प्रभो सुरसरिद्धृतशेखर हे गु

रो ॥ मम विभो किमु विस्मरणं कृतं शिव ह० ॥९॥ नरहरेरतिरं जनसुंदरं पठति यः शिवरामकृतस्तवम् ॥ विशति रामरमाचरणांबुजे शिव ह० ॥ १० ॥ प्रातरुत्थाय यो भक्त्या पठेदेकाग्रमानसः॥विजयो जायते तस्य विष्णुमाराध्यमाप्नुयात् ॥११॥ इति श्रीरामानंदविरचितं शिवरामस्तोत्रम् ॥ ११० ॥

॥ अथ शंकराचार्यकृतगुर्वष्टकं ॥

श्रीगणेशाय नमः ॥ शरीरं सुरूपं तथा वा कलत्रं यशश्चारु चित्रं धनं मेरुतुल्यम् ॥ मनश्चेन्न लग्नं हरेरंघ्रिपद्मे ततः किं ततः किं ततः किं ततः किं ॥१ ॥ कलत्रं धनं पुत्रपौत्रादि सर्वं गृहं बांधवाः सर्वमेतद्धि जातम् ॥गुरोरंघ्रिपद्मे मनश्चेन्न लग्नं ततः किं ततः किं ततः किं ततः किम् ॥ २ ॥ षडंगादिवेदो मुखे शास्त्रविद्या कवित्वादि गद्यं सुपद्यं करोति ॥ गुरोरंघ्रिपद्मे० ॥ ३ ॥ विदेशेषु मान्यः स्वदेशेषु धन्यः सदाचारवृत्तेषु मत्तो न चान्यः॥ गुरोरंघ्रिपद्मे० ॥ ॥ ४ ॥ क्षमामंडले भूपभूपालवृंदैः सदा सेवितं य

स्य पादारविंदम् ॥गुरोरंघ्रिपद्मे० ॥ ५ ॥ यशो मे गतंदिक्षु दानप्रतापाज्जगद्वस्तु सर्वं करे यत्प्रसादात् ॥ गुरोरंघ्रिपद्मे० ॥ ६ ॥ न भोगे न योगे न वा वाजिराजौ न कांतासुखे नैव वित्तेषु चित्तत् ॥ गुरोरंघ्रिप० ॥७॥अरण्ये न वा स्वस्य गेहे न कार्ये न देहे मनो त्वर्तते मे वनर्ध्ये ॥ गुरोरंघ्रिपद्मे०॥ ८ अनर्घाणि रत्नानि भुक्तानि सम्यक्समालिंगिता कामिनी यामिनीषु॥गुरोरंघ्रिपद्मे० ॥ ९॥ गुरोरष्टकं यः पठेत्पुण्यदेही यतिर्भूपतिर्ब्रह्मचारी च गेही ॥ लभेद्वांछितार्थं पदं ब्रह्मसंज्ञं गुरोरुक्तवाक्ये मनो यस्य लग्नम् ॥ १० ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचितं गुरोरष्टकं संपूर्णं ॥ ११२ ॥ श्रीरस्तु ॥ ॥ ॥ ॥

॥ अथ प्रश्नोत्तररत्नमालिका ॥

श्रीगणेशाय नमः ॥ कः खलु नालंक्रियते दृष्टादृष्टार्थंधनपटीयान् ॥ अनया कंठस्थितया प्रश्नोत्तररत्नमालिकया ॥ १ ॥ भगवन्किमुपादेयं गुरुवच

नं हेयमपि च किमकार्यम् ॥ को गुरुरधिगततत्त्वः सत्वहितायोद्यतः सततम् ॥ २ ॥ त्वरितं किं कर्तव्यं सुधिया संसारसंततिच्छेदः ॥ किं मोक्षतरोर्बीजं सम्यग्ज्ञानं क्रियासहितं ॥ ३ ॥ कः पथ्यतरो धर्मः कः शुचिरिह यस्य मानसं शुद्धम् ॥ कः पंडितो विवेकी किं विषमवधीरणा गुरुषु ॥ ४ ॥ किं संसारे सारं बहुशो विचिंत्यमानमिदमेव ॥ मनुजेषु दृष्टतत्त्वं स्वपरहितायोद्यतं जन्म ॥ ५ ॥ मदिरेव मोहजनकः कः स्नेहः के च दस्यवो विषयाः ॥ का भववल्ली तृष्णा को वैरी यस्त्वनुद्योगः ॥६॥ कस्माद्भयमिह मरणादंधादपि को विशिष्यते रोगी॥ कः शूरो यो ललनालोचनबाणैर्न च व्यथितः॥७॥ पातुं कर्णांजलिभिः किममृतामिव युज्यते सदुपदेशः ॥ किं गुरुतया मूलं यदेतदप्रार्थनं नाम ॥ ८॥ किं गहनं स्त्रीचरितं कश्चतुरो यो न खंडितस्तेन ॥ किं दारिद्र्यमतोषः किं लाघवं परधनपरा याच्ञा ॥ ९ ॥ किं जीवितमनवद्यं किं जाड्यं पाटवे

प्यनभ्यासः॥ को जागर्त्ति विवेकी का निद्रा मूढता जंतोः ॥ १०॥ नलिनीदलगतजलवत्तरलं किं यौवनं धनं चायुः॥ के शशधरकरनिकरानुकारिणः सज्जना एव॥ ११॥ को नरकः परवशता किं सौख्यं सर्वसंगविरतिर्या॥किं साध्यं भूतहितं किमु प्रियं प्राणिनामसवः॥ १२॥ किं दानमनाकांक्षं किं मित्रं यन्निवर्तयति पापात्॥ १३॥ कोऽलंकारः शीलं किं वाचां मंडनं सत्यं॥ किमनर्थफलं मानः सुसंगतिः का सुखावहा मैत्री ॥१४॥ सर्वव्यसनविनाशे को दक्षः सर्वथा परित्यागी॥कोंऽधो योऽकार्यरतः को बधिरो यः शृणोति न हितानि ॥१५॥को मूको यःकाले प्रियाणि वक्तुं न जानाति ॥ किं मरणं मूर्खत्वं किमनर्घ्यं दत्तमवसरे यच्च॥१६ आमरणात्किं शल्यं प्रच्छन्नं यत्कृतं पापम् ॥कुल विधेयो यत्नो विद्याभ्यासे सदौषधे दाने॥१७॥अवधीरणा क्व कार्या खलपरयोषित्परधनेषु॥ काऽहर्निशमनुचिंत्या संसारासारता न तु प्रमदा॥१८॥

का प्रेयसी विधेया करुणा दीनेषु सज्जने मैत्री॥
कंठगतैरप्यसुभिः कस्यात्मा न वशमुपयाति॥१९॥
मूर्खस्य विषादवतो गर्ववतोऽपि च कृतघ्नस्य॥कः
पूज्यः सद्वृत्तः कमधममाचक्षते चलितवृत्तं॥२०॥
केन जितं जगदेतत्सत्यतिक्षावता पुंसा ॥ कुत्र
विधेयो वासः सज्जननिकटेऽथवा काश्याम्॥२१॥
कस्मै नमस्क्रिया स्याद्देवानामपि दयाप्रधानस्य॥
कस्मादुद्वेजितव्यं संसारारण्यतः सुधिया॥२२॥
कस्य वशे प्राणिगणः सत्यप्रियभाषिणो विनीत
स्य॥ क्व स्थातव्यं न्याय्ये पथि दृष्टार्थलाभाय
॥२३॥ विद्युद्विलसितचपलं किं दुर्जनसंगतिर्यु
वतयश्च॥ कुलशीलनिष्प्रकंपाः के कलिकालेऽपि
सत्पुरुषाः ॥२४॥ किं शोच्यं कार्पण्यं सति विभवे
किं प्रशस्य मौदार्यम्॥तनुतरविभवस्य प्रभाविष्णो
र्वा किं यत्सहिष्णुत्वम्॥२५॥ चिंतामणिरिव दु
र्लभमिह किं कथयामि चतुर्भद्रम्॥ किं तद्वदंति
भूयो विधूततमसो विशेषेण॥२६॥ दानं प्रिय

वाक् सहितं ज्ञानमगर्वं क्षमान्वितं शौर्यम् ॥ वित्तं त्यागसमेतं दुर्लभमेतच्चतुर्भद्रम् ॥ २७ ॥ इतिकंठगता विमलप्रश्नोत्तर रत्नमालिका येषाम् ॥ तेऽमुक्ताभरणा अपि विभांति विद्वत्समाजेषु ॥ २८ ॥ इतिश्रीमच्छंकराचार्य विरचिता प्रश्नोत्तर रत्नमालिका संपूर्णा ॥ —